International Journal of Sanskrit Research 2024; 10(4): 276-281

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(4): 276-281
© 2024 IJSR
www.anantaajournal.com
Received: 08-04-2024
Accepted: 13-05-2024

**Vidwan Manjesh M**
Guest Lecturer, Department of Studies and Reseach in Sanskrit, Bangalore University, Jnanabharathi Campus, Bengaluru, Karnataka, India

**Corresponding Author:**
**Vidwan Manjesh M**
Guest Lecturer, Department of Studies and Reseach in Sanskrit, Bangalore University, Jnanabharathi Campus, Bengaluru, Karnataka, India

# मनुस्मृतावबलाविमर्शः

**Vidwan Manjesh M**

**DOI:** https://doi.org/10.22271/23947519.2024.v10.i4e.2456

## प्रस्तावना

धर्मशास्त्रस्य प्रमुखग्रन्थेषु मनुस्मृतिरिति अन्यतमा इति भरतखण्डवर्तिनः वयं विजानीमहे । मनुस्मृतिः मनुसंहिता इत्यपि प्रसिद्धा। भारतीयन्यायस्य, सामाजिकजीवनस्य च प्राचीनग्रन्थः अयम्। मनुस्मृतिः हिन्दूधर्मस्य प्राचीनः विधिग्रन्थः अथवा 'धर्मशास्त्रम्' वेति प्रसिद्धम् । अस्मिन् आर्यकालात् आरभ्य सामाजिकव्यवस्थायाः वर्णनं कृतमस्ति । सर्वेषां सविवरम् उल्लेखः अत्र दृश्यते। तस्मिन् काले भरतदेशेऽस्मिन् उन्नतसभ्यता, संस्कृतिः च आसीत् । या केषाञ्चन इतिहासकाराणाम् मते ३५०० ईपूतः ६००० अथवा ८००० ईपू यावत् आसीत् । केचन विद्वांसः मन्यन्ते यत् मनुस्मृतेः प्राचीनतमं रूपं मौर्यकालस्य (प्रायः चतुर्थतः तृतीयशताब्द्याः ईपू) अनन्तरं लेखनम् अभवत् इति । यदा तु तस्य अन्तिमरूपं गुप्तकालस्य (ई.पू.चतुर्थतः ५ शताब्द्याः यावत्) रचितम् अभवत् अयं ग्रन्थः इति अवगम्यते । प्राचीनभारतीयसमाजस्य धार्मिकसामाजिकसंरचनायाः प्रतिनिधित्वं च अवगाहते अयं ग्रन्थः । अस्मिन् ग्रन्थे भारतीयधर्मस्य, समाजस्य, नैतिकतायाः, विधेः, सामाजिकाचरणस्य च विविधाः पक्षाः प्रस्तुताः सन्ति । अयं ग्रन्थः भारतीयानामस्माकं शताब्दशः महत्त्वपूर्णः स्रोतः वर्तते। अस्मिन् आलेखे न केवलं समाजस्य विभिन्नवर्गाणां नियमाः, निर्देशाः च प्रदत्ताः सन्ति, अपि तु स्त्रियः विषये बहवः महत्वपूर्णाः अंशाः उल्लिखिताः सन्ति। मनुस्मृतेः एते नियमाः विचारधाराश्च स्त्रियः सामाजिकस्थानाधिकारकर्तव्यञ्च परिभाषन्ते । यदा स्त्रियः अधिकारस्य विषयः दृश्यते तदा मनुस्मृतौ बहवः विवादास्पदाः समीक्षात्मकाः च दृष्टिकोणाः प्राप्यन्ते। मनुस्मृतौ महिलाधिकारविषये यो विचारः वर्तते सः समाजे गहनप्रभावं जनितवत् । वेदकालादारभ्योपि महिलायाः स्थानम् अतीव महत्वपूर्णं वर्तते । सा एव समाना स्थितिः अधुनापि आनेतव्या इति विवक्षा । धार्मिकाचरणेषु च तासां भागभाक्तृत्वं सम्पादनीयम् । पारिवारिक-सामाजिक हिंसाकृत्येभ्यः ताः रक्षणीयाः ।

एकैव स्त्री माता, पुत्री, भगिनी, शिक्षकी, पत्नी, इति नाना दायित्वं भजते। समाजः समृद्धः, सन्तोषमयः, प्रगतिपूर्वकश्च यदि स्यात् तर्हि समाजे महिलया उन्नतस्थाने भाव्यम् एवं सुरक्षिततया स्थेयम्।

समाजे मुख्यं स्थानं महिलायाः वर्ततेति वयं जानीमः । तस्याः अनुग्रहमन्तरा न किञ्चित् सेत्स्यति । तस्मादेव अस्माकं मुनिभिः अग्रस्थानं महिलासु निर्दिष्टम् । "यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः" इत्यादिना स्त्रीणां प्राधान्यं, सहनशीलता, तितिक्षा, क्षमागुणाश्च कीर्तिताः। अर्धनारीश्वरतत्वम् अनुसरन्तो वयं स्त्रीपुं भेदरहिताः स्मः। आसमन्तादारभ्य स्त्री पुरुषेभ्यः न्यूना वर्तते इति न कुत्रापि दृष्टम् अस्माभिः। स्वीयं योगदानं सर्वेष्वपि क्षेत्रेषु ताभिरपि प्रदत्तम् । एवं विचिन्त्यमानायाम् अस्यां सरणौ, नारी कथं उच्चस्थानं प्राप्नोत्यस्मिन् समाजे ? कथं वा तस्याः जीवनशैली असीत्? इत्येवमादि जिज्ञासा कर्तव्या एव । अतः अस्मिन् शोधलेखे मनुना स्मृतौ स्त्रीभ्यः परिकल्पितस्य स्थानस्य, स्वतन्त्रतायाः, शिक्षायाः, विवाहस्य, मातृत्वस्य, समाजे तासां भूमिका इत्येतेषु विषयेषु च समीक्षात्मकरूपेण विस्तृतविश्लेषणाय यत्नः क्रियते । येन स्त्री कुतः विशिष्टं स्थानमवगाहतेत्यस्मिन् लोकेति ज्ञातुं शक्यम्।

मनुस्मृतौ स्त्रीणां परिकल्पना एव अतीव रम्या एवं क्वचित् स्थलेषु प्रश्नास्पदश्च । प्रकृते स्त्रियः महत्त्वं नानापक्षेभ्यः प्रस्तुतमस्ति । परन्तु तत्कालिकाः बहवः नियमाः सन्ति, ये अद्यतनसन्दर्भे विवादास्पदाः इति दृश्यन्ये। मनुस्मृतौ स्त्रियाः विषये बहवः श्लोकाः सन्ति, येषु तासाम् अधिकारः, कर्तव्यांशः, सामाजिकीस्थितिः च वर्णिता । एतेषां श्लोकानां विश्लेषणं महत्त्वपूर्णं कार्यम् । यतो हि एतेषु श्लोकेषु प्राचीनभारतीयसमाजस्य, स्त्रियः उपर्युक्तगुणानां प्रतिबिम्बदर्शनं भवति । इह केचन प्रमुखश्लोकाः व्याख्यायन्ते एवम् अन्येपि विचाराः प्रस्तूयन्ते ।

१. गृहिण्याः महत्त्वम्: स्त्री कुटुम्बस्य प्रधानस्तम्भत्वेन गार्हपत्यं निर्वहति I अत एव मुख्यभूमिका गृहिणीत्वम् इति वर्णितम् अस्ति I धार्मिकाचरणेषु, आदानप्रदानेषु स्त्री नूनं मुख्यं स्थानं भजते । नित्यं अग्निहोत्रमनुष्ठीयमानो शौत्रियः स्वपत्नीम् अग्निहोत्रकर्मणि भागभाजां करोति । या यज्ञेऽपि प्राधान्यं भजते Iकिञ्च स्त्रियः मुख्यं कार्यं पतिपरिवारस्य, गृहस्य च पालनम्| स्व छात्रेभ्यः इयमेव प्रथमाचार्यत्वेन शिक्षां प्रयच्छति I परिवारस्य समाजस्य च हिताय कार्यं कर्तुं अधिकारः अस्यै दत्तः I महत्त्वपूर्णं यत् मनुस्मृतेः विचाराः प्राचीनकालस्य सामाजिकसंरचनायाः प्रतिबिम्बरूपेण इह वर्तन्ते । आधुनिककाले एतेषां विचाराणाम् अनुसरणं न भवति| कालान्तरे समाजे महिलानां अधिकारस्य स्वतन्त्रतायाः च विषये महत्त्वपूर्णानि परिवर्तनानि सञ्जातानि I

**२. स्त्रियः सम्माननम्**

"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः" ॥ मनुस्मृति (३.५६)

**भावार्थः** अस्मिन् श्लोके स्त्रियः सम्मानस्य महत्त्वं व्याख्यातम् अस्ति। यत्र कुले पित्रादिभिः स्त्रियः पूज्यन्ते, तत्र देवताः प्रसीदन्ति। यत्र पुनरेताः न पूज्यन्ते तत्र देवताप्रसादाभावात्यागादिक्रियाः सर्वाः निष्फलाः भवन्तीति निन्दार्थवादः अत्र प्रस्तुतः। प्रत्युत यत्र स्त्रियः आदरः न भवति, तत्र सर्वधर्मसामाजिककार्याणि व्यर्थी भवन्ति । अस्मिन् श्लोके स्त्रियः आदरस्य, गौरवस्य च विषये कथितं, येन तत्कालीने समाजे स्त्रीणां आदरपूर्णमनोवृत्तिरपि प्रतिबिम्बिता। किञ्च अन्यान्यपि उदाहरणानि एवं वर्तन्ते ।

1. **स्त्रीयः पूज्याः सदा देव्यः पूजन्ति ये न ताः क्वचित्।**

ये स्त्रीणां सम्माननं न कुर्वन्ति ते न कदापि समृद्धिं प्राप्नुवन्ति इति अत्र उच्यते।

2. यस्य पूजा स्त्रियस्तस्य वंशो भवति सुप्रतिष्ठितः।

यस्य वंशस्य स्त्री सम्मानिता भवति तस्य वंशस्य समृद्धिः एवं प्रतिष्ठा वर्धते इति।

**३. धार्मिकसामाजिकदायित्वम्:** मनुस्मृतौ उक्तं यत् यत्र महिलासु आदरभावः प्रदर्श्यते तत्र देवाः निवसन्ति इति। एषः आदरभाव एव सामाजिकभूमिकां स्त्रीषु दर्शयति। मनुस्मृतिः गृहजीवनं, पतिसेवा च स्त्रियः मुख्यः धर्मः इति मन्यते। तत्र उक्तं यत् भर्तुः सेवा, पारिवारिकजीवनं, चारुकृतिश्च स्त्री कृत्यमिति।

"नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं न च हुतम्।
पतिं शुश्रूषते येन तेन स्वर्गे महीयते" ॥ मनुस्मृतिः (५.१५५)

**विश्लेषणम्:** अस्मिन् श्लोके उक्तं यत् स्त्रीभ्यः यज्ञस्य, उपवासस्य, हवनस्य वा पृथक् प्राधान्यं नास्ति। ताभ्यः उक्तं भर्तृ सेवनया स्वर्गप्राप्तिः इत्येतत्। अस्मिन् श्लोके स्त्रियः धार्मिकाध्यात्मिकदायित्वं भर्तृसेवायै समर्प्येत, येन तत्कालीनसामाजिकव्यवस्थायां स्त्रियः धार्मिकस्वतन्त्रता परिच्छिन्नम् आसीत् इति सूचयति। श्लोकान्तरेण च उपवासस्य निन्दा अपि दर्शिता –

पत्यौ जीवति या तु स्त्री उपवासं व्रतं चरेत्।
आयुष्यं हरते भर्तुः नरकं चैव गच्छति ॥ मनुस्मृतिः (५.१५५.२२)

**भावार्थः** भर्ता जीवति सति या उपवासव्रतम् अनुतिष्ठति, सा नरकं गच्छन्ती भर्तुः आयुष्यं च हरते इति अनेन श्लोकेन निर्दिष्टम् वर्तते। उपवासाद्यनुष्ठानकर्माण्यपि अस्यां प्रतिषिद्धानि।

**४. संरक्षणम् अनुशासनं च:** अनुशासनादि गुणाः स्त्रीभ्य एव लोके प्रथिताः सन्तः अधुनापि दृश्यते।तासां रक्षणं च अस्माकं कर्तव्यम्। यद्यपि मनुस्मृतिः स्त्रियः सुरक्षायाः विषये प्राधान्यम् आवहति। तथापि अस्मिन् अनेके नियमाः, व्यवहाराः च उल्लिखिताः सन्ति, ये अद्यतनसन्दर्भे स्त्रियः स्वतन्त्रता सीमावच्छिन्ना इति गणयितुं शक्यते। स्त्री जीवनस्य विभिन्नेषु चरणेषु पुरुषैः रक्षयितव्या एव। बाल्यकाले पितुः, यौवने पत्युः, वृद्धावस्थायां पुत्रस्य च अधीना भवेत्। अत एव भर्तुः, पितुः, पुत्रस्य वा वशी स्यात् महिला इति उपदेशः मनुस्मृतौ दृश्यते। महिला जीवने सर्वदा कस्यचित् पुरुषस्य अधीना एव तिष्ठेत्। तस्याः कदापि स्वातन्त्र्यं नास्तीति आदिष्टम्। स्त्रीणां रक्षणाय अयम् उल्लेखः। जीवने कस्मिन्नपि काले स्त्रियः स्वातन्त्र्याधिकारः न भवेत् इति भावः।

तदुक्तम् -

बाल्ये पितुर्वशे तिष्ठेत्पाणिग्रहस्य यौवने।
पुत्राणां भर्तरि प्रेते न भजेत्स्त्री स्वतन्त्रताम् ॥ मनुस्मृतिः (५.१४८)
"पिता रक्षति कौमारे भर्ता रक्षति यौवने।
रक्षन्ति स्थविरे पुत्रा न स्त्री स्वातन्त्र्यमर्हति॥" मनुस्मृतिः (९.३)

**विश्लेषणम्:** अस्मिन् श्लोके स्त्रियः जीवनस्य त्रयः महत्त्वपूर्णाः चरणाः वर्णिताः सन्ति। बाल्यकालः, यौवनकालः, वृद्धाप्यकालः च। एतेषु त्रिषु चरणेषु स्त्रियः क्रमशः पितृपतिपुत्राणां रक्षणे जीवन्ति। तद् व्याख्यातं, पिता विवाहात्पूर्वं स्त्रियं रक्षेत्, पश्चाद्भर्ता तदभावे पुत्राः।तस्मान्न स्त्री कस्यांश्चिदप्यवस्थायां स्वातन्त्र्यं भजेत्।इह भर्ता रक्षति यौवने इत्यादि प्रायिकम्, अभर्तृपुत्रायाः संनिहितायाः पित्रादिभिरपि रक्षणात्।अन्ततो गत्वा स्त्रियः स्वातन्त्र्ययोग्याः न भवन्तीति श्लोकस्य तात्पर्यम्। एषः विचारः तत्कालीनस्य पितृसत्तात्मकसामाजिकसंरचनायाः

प्रतिबिम्बमात्रम्। यत्र स्त्रियः स्वतन्त्रता सीमावच्छिन्ना, नियन्त्रणावच्छिन्ना च आसीत् ।

**महिलानां शिक्षा:** मनुस्मृतौ महिलानां शिक्षायाः विषये बहुधा विकल्पः दृष्यते । तत्र प्रथमस्तावत् स्त्रीणां शिक्षा विषये न कोपि निर्बन्धः मनुना सूचितः इति । ताः गुरोः निकटे वसन्तः स्वेष्टां शिक्षां प्राप्तुं शक्नुवन्तीति उक्तम् । किञ्च विवाहात् प्राक् तया अवश्यं गुरोः निकटे उपविश्य शिक्षा प्राप्तव्या इति स्पष्टमुक्तम् वर्तते, गुरौ वासो इत्यादिना । किञ्च "अधीयमाना भर्तारमधिगच्छेत्" इति श्लोके पित्रादिभिः अधीयमाना कुमारी इत्येव व्याख्यानं दृश्यते। अनेन स्त्रीणां शिक्षा विहिता एव आसीत् इति अवगम्यते । क्वचित् मनुस्मृतिः महिलाभ्यः शिक्षायाः, धार्मिकाधिकारस्य च प्रतिबन्धनमपि स्थापयति। ताभ्यः वेदाध्ययनस्य अनुमतिः नासीत्, यज्ञादिधर्मेषु तासां सहभागिता नैव वर्तते इत्यपि अवगम्यते ।

**मनुस्मृतौ स्त्रियः कर्तव्यसम्बद्धाः केचन महत्त्वपूर्णाः बिन्दवः निम्नलिखितरूपेण सन्ति**

**भर्तुः आज्ञापालनम् :** मनुस्मृतौ उक्तं यत् स्त्रीणां मुख्यं कर्तव्यं भर्तुः आज्ञापरिपालनं, तस्य सेवा, ईश्वरसमो दृष्टिः इत्यादि। भर्तुः सेवा आदरश्च मनुमते सर्वोच्चः कर्तव्यः ।भर्तुः सेवनया तस्य सम्मानः च भवति । भर्तुः सेवां धर्मानुष्ठानमिति मन्तव्यमिति च तत्र उक्तम् । भर्तरि निष्ठा, पूर्णभक्तिः च तादृशी स्यात् येन भर्तृव्यतिरिक्तं पुरुषं अपि न चिन्तयेत् । पातिव्रत्यधर्मविषये "नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम्" इत्यादि श्लोकैः च ख्यापितम् । अस्य तात्पर्यं तु स्त्रियः यज्ञः, दानं, उपवासः वा नास्ति; भर्तुः सेवामात्रेण स्वर्गं लभते इति । ग्रन्थस्यास्य पठनसन्दर्भे स्त्रियः काश्चन सीमाः, निर्देशाः च सन्ति इति विज्ञायते । यत्र स्त्रियः नाति स्वातन्त्र्यं वयं द्रष्टुम् शक्नुमः ।

**कुटुम्बः गृहश्च:** गृहस्य प्रबन्धनं, कुटुम्बस्य परिचर्या च स्त्रिणां कर्तव्यमिति कथ्यते । अस्मिन् शिशोः पालनं, गृहकार्यं, कुटुम्बे वृद्धानां परिचर्या, गृहस्य सर्वाणि कार्याणि सम्पादयितुं च दायित्वं दत्तम् अस्ति । अत एव मनुमते स्त्रियः पितृपतिपुत्रसंरक्षणाय जीवेयुः इत्युक्तम्।

**धर्माभ्यासः** धर्मानुष्ठानेषु, उत्सवेषु च भागं ग्रहीतुं, उपवासं, संस्कारं च कर्तुं, पारिवारिकधर्माचरणाय च महिलाभ्यः अवकाशः दत्तः अस्ति । इह भक्तिविशिष्टा स्त्री आदर्शत्वेन मन्यते।

**नियमाः आचरणं च:** समाजे अनुशासनस्य, शिष्टाचारस्य च अनुसरणं, संयमनं, विनयस्य आदरस्य च पालनम् अवश्यं कर्तव्यम् इति उक्तम् । ताः सर्वदा परिवारस्य समाजस्य च नियमानाम् अनुसरणं कुर्युः। सदाचारः शुद्धिश्च स्त्रियः सद्वृत्तिः, पातिव्रतत्वं च आदर्शभूतम् इति च उक्तम् ।किञ्च स्त्रियः नैतिकाचरणविषये कठोरनियमाः सन्ति । यथा विवाहानन्तरं स्त्रियः आजीवनं भर्तरि निष्ठावत्यः एव भवेयुः । यदि पतिः म्रियते तर्हि विधवा आजीवनं धीरधर्माचरणं च कुर्यात् इति । नारीणां विग्रहे क्षमा वदान्या विनीता च या इत्यनेन महिलासु क्षमा, विनीतता एवं दानित्वगुणाः आवश्यकाः इति च सूचितम् ।

**स्त्रीणां षण्णिषेधाश्च सूचिताः । ते इत्थं वर्तन्ते**

पानं दुर्जनसंसर्गः पत्या च विरहोऽटनम् ।
स्वप्नोऽन्यगेहवासश्च नारीसंदूषणानि षट् ॥ मनुस्मृति (९.१३)

**भावार्थः** मध्यपानं, असत्पुरुषसंसर्गः, भर्त्रा सह विरहः, इतस्ततश्च भ्रमणं, अकालस्वापः, परगृहनिवासः इत्येतानि षट् स्त्रिया व्यभिचाराख्यदोषजनकानि । तस्मादेतेभ्यः एताः रक्षणीयाः इति अयं श्लोकः कथयति । एते नियमाः महिलानां व्यक्तिगतजीवनस्य

प्रत्येकं पक्षं नियन्त्रयन्ति । तासां सामाजिकं, व्यक्तिगतं च स्वतन्त्रतां सीमितं कुर्वन्ति ।

परन्तु मनुस्मृतौ नारीकर्तव्यविषये एषा विचारधारा प्राचीनकालस्य सामाजिकसंरचनायाः आधारेण वर्तते । अद्यतनकाले स्त्रियः भूमिकासु अधिकारेषु च बहु परिवर्तनं जातम् । तासां समानतायाः, स्वतन्त्रतायाः च अधिकारः अस्ति। मनुस्मृतिः स्त्रियः भूमिकायाः अधिकारस्य च विषये बहूनि विवादास्पदानि वचनानि वदति । तदधुना न सम्मानार्हं भवति इत्यपि कालोचितम्।

**विवाहसंस्कार**: विवाहसम्बद्धाः बहवः नियमाः विचाराश्च अस्मिन् ग्रन्तभागे व्यक्ताः सन्ति । समाजस्य विभिन्नवर्गानुसारं ब्राह्मविवाहः, दिव्यविवाहः, राक्षसविवाहः इत्यादयः विविधाः विवाहाः वर्णिताः सन्ति । किञ्च विवाह संस्कारोपि विशेषतया अत्र निरूपितः वर्तते । तद्यथा -

वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः ।
पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिक्रियाः ॥ मनुस्मृतिः (२.६७)

**भावार्थः** विवाहविधि एव स्त्रीणां वैदिकः संस्कार उपनयनाख्यः मन्वादिभिः स्मृतः ।पतिसेवैव गुरुकुले वासः, वेदाध्ययनरूपः । गृहकृत्यमेव सायम्प्रातः समिद्धोमरूपोऽग्निपरिचर्या । तस्मात् विवाहादेः उपनयनस्थाने विधानात् उपनयनादेः निवृत्तिः इति इह सूचितम् ।

विवाहसम्बद्ध महिलाधिकारविषयः

"स्वयमुद्धारकं कन्यां द्विजातेर्यस्य चोदिता।
पित्रा वा भ्रात्रा वा ज्ञात्या सोऽनुमन्तव्यो विद्वता॥इति ।

**मुख्यतया मनुस्मृतौ स्त्री विवाहविषये निम्नलिखितवचनानि उक्तानि सन्ति**

1. **संगठनम्:** मनुमते स्त्रियः आयुः योग्यतायाः आधारेण पित्रा, भ्रात्रा अन्यैः बन्धुभिः वा विवाहः करणीयः ।
2. **धर्मः संस्कृतिश्च:** विवाहः धर्मसंस्कृतेः महत्त्वपूर्णः भागः इति मन्यते । न केवलं व्यक्तिगतसम्बन्धस्थापनम्, अपि तु सामाजिकधर्मस्य अपि भागः अस्ति ।
3. **आत्मसम्मानं मानं च:** विवाहानन्तरमपि स्त्रियः मानं स्वाभिमानं च रक्षेत् इति उक्तम् । तस्याः स्थानम्, अधिकारः च कुटुम्बे महत्त्वपूर्णः इति ख्यापितम् ।
4. **पारिवारिकदायित्वम्:** विवाहानन्तरं स्त्रियः परिवारस्य पत्युः विषये च दायित्वं निर्वहेत् । तद्विषये एतावता चर्चा कृता । एते विचाराः मनुस्मृतेः विभिन्नेषु अध्यायेषु विस्तृतरूपेण वर्णिताः सन्ति । भारतीयसमाजस्य पारम्परिकदृष्टिकोणं च प्रतिबिम्बयन्ते।

## निगमनम्

मनुस्मृतौ स्त्रियः अधिकारस्य, स्थितेः, स्वतन्त्रतायाः, शिक्षायाः, विवाहस्य, च विचाराः तत्कालीनसामाजिकसंरचनायाः प्रतिबिम्बरूपेण निरूपिताः । एते विचाराः अद्यत्वे चर्चास्पदाः विवदास्पदाश्च वर्तन्ते । यतो हि ते महिलानां स्वतन्त्रतां, शिक्षाम्, अधिकारं च सीमावच्छिन्नं कुर्वन् स्वीयं मतमुपस्थापयत् मनुः । परम् आधुनिकसमाजेस्मिन् स्त्रियः अधिकारस्य विषये चिन्तनरीतिः सर्वथा परिवर्तिता वर्तते। स्त्री स्वतन्त्रा, समाजे तस्याः पुरुषवत् प्राधान्यं दृश्यते । कृत्यानां विषयेऽपि आदर्शस्थितिः द्रष्टुं शक्यते । देशाय कीर्त्यानयने महिलानाम् अपि योगदानम् अधुना दृश्यते ।

परन्तु मनुस्मृतेः नियमाः विचाराः च प्राचीनकालस्य सामाजिकसंरचनायाः मनोवृत्तेः च आधारेण भवन्ति, ते अद्यतनसमाजे प्रासङ्गिकाः इति न मन्यन्ते । अनेके विद्वांसः आधुनिकचिन्तकाः च मनुस्मृतेः एतेषां सिद्धान्तानां विषये

विशेषतया महिलाधिकारस्य सन्दर्भे अनेकप्रकारैः चिन्तनं कृतवन्तः । परन्तु समग्रस्य ग्रन्थभागस्य अध्ययनेन इदम् तु अवगम्यते मनोः मतिः स्त्री सहिष्णुतायै स्पन्दते इति । स्त्रीणां मौल्याय रक्षणाय एव यतते इत्यपि भासते। अत एव मनुः जेगीयतेतराम् । अन्ततो गत्वा प्रसक्तयुगम् अवलम्ब्य राष्ट्रस्य अभिवृद्धये, नित्यं यतमानाः स्त्रियः नैकाः दृश्यन्ते । मनुरुक्तरीत्या ताः सादरं गौरवपूर्वकं पश्यन्तः वयं तासु व्यवहरामः । नारी शक्तेः रक्षणाय वयं बद्धकटयः भवेम । माता भूमिः प्रसीदतु । जननी लीलावती अनगृह्णातु इति वदन् मातृशक्तिः जगति विलसतु।

## ग्रन्थसूची


1. मनुस्मृतिः (श्री पं हरगोविन्दशास्त्री)
2. अमरकोशः (विद्वान् एन् रङ्गनाथशर्मा संस्कृत भारती प्रकाशनम्)
3. The Position of Women in Hindu Civiligation (A.S. Altekar, Banaras, 1938)
4. मनुस्मृति का स्त्री विमर्श ( डॉ. शशि कांत )
5. मनुस्मृति - मूल पाठ और विभिन्न भाष्यों का अध्ययन (मनु - मोतीलाल बनारसीदास)
6. धर्मशास्त्र और नारी: एक समाजशास्त्रीय अध्ययन (डॉ. सरोजिनी कुलकर्णी- साहित्य अकाडमी)
7. Manusmriti and Women A Critical Analysis (वी. एन. धर)
8. वेदों और स्मृतियों में स्त्री की स्थिति (डॉ. सुधा शास्त्री -प्रभात प्रकाशन)